राजपट्टाभिधानेन स्थानमेतन्निगद्यते ।
अस्मिन् गृहं नृपः कृत्वा सुचिरं सुखमश्नुते ॥
अज्ञानाद् दम्भतो राजा योऽन्यत्र गृहमारभेत् ।
सोऽचिरात् मृत्युमाप्नोति रोगं शोकं भयं तथा ॥
यमदण्डोदयदण्डौ केनाहतिरुपप्लवः ।
ये चान्ये वास्तुदोषाः स्युः स्थाने दोषाश्च ये पुनः ।
न स्पृशते राजपट्टस्तैः सर्पैर्गरुड़ो यथा ॥
द्विगुणादिरतोऽपि स्यात् क्रमाद्वृद्धादिवास्तुषु ।
राजछत्रमितेऽप्येवं प्राचीरे गुणदोषकौ ॥”*॥
अथ जयाख्यस्य चतुरस्रस्य वास्तुखण्डनिर्णयः ।
“राजद्वारे हि प्राकारा राजछत्रान्तरे मताः ।
यमद्वारे सार्द्धं राजछत्रान्तरे च ये नृपाः ॥
अपद्वारे राजदण्डं जिता आरम्भिताः पुनः ।
अद्वारे भूपतेस्तस्य राजदण्डत्रयान्तरे ॥
एवं व्यवस्थिते स्थाने मध्यमे तत् प्रदृश्यते ।
आयामे राजछत्राणि चत्वारि परिणाहतः ॥
राजछत्रैकमानेन राजदण्ड उदाहृतः ।
अयञ्च सप्तमो भागो वास्तोर्भवति शोभनः ॥
अस्मिन् गृहं नृपः कृत्वा सुचिरं पाति मेदिनीम् ।
अस्मिन् विजयवृद्धिश्च सौख्यञ्च समवाप्नुयात् ॥
यो राजा दम्भतोऽन्यत्र वेश्मारम्भं समाचरेत् ।
य उक्तो राजदण्डोऽयं तस्येदं स्थानपञ्चकम् ॥
गजो व्याघ्रश्च सिंहश्च मृगो भृङ्गो यथाक्रमम् ।
सिंहे सिंहासनं स्थानं व्याघ्रे स्यात् दारमन्दिरम् ॥
गजे यात्रालयं कुर्य्यात् मृगे केलिनिकेतनम् ।
भ्रमरेऽन्तःपुरं कुर्य्यात् क्रमेण पृथिवीपतेः ॥
तेन मध्यमेव सिंहासनं दीर्घस्य चतुरस्रकैः ॥”
तत्र भविष्योत्तरे ।
“मेषादिचन्द्रे जातस्य नृपतेः स्युरनुक्रमात् ।
द्वादशैव गृहान् वक्ष्ये तेषां लक्षणमग्रतः ॥
सुनन्दः सर्व्वतोभद्रो भयो नान्दीमुखस्तथा ।
विनोदश्च विलासश्च विजयो विमलस्तथा ।
रङ्गः केलिर्जयो वीरो द्वादशैते प्रकीर्त्तिताः ॥”
अथैषां लक्षणानि ।
“यद्यत्रैवोच्यते मानं तस्य तेनैव कल्पना ।
राज्ञः स्वहस्तमेकन्तु दीर्घं सर्व्वत्र निक्षिपेत् ॥
आयामेन सुन्दरः स्यात् राजहस्तैश्च पञ्चभिः ।
परिणाहे चतुर्भिश्च राजहस्तैः प्रतिष्ठितः ॥
अस्याधिदेवता भौमो रक्षतीदं वसुन्धरा ।
द्वाराणि विंशतिश्चास्य रक्तचित्राहतानि च ॥
रक्तपट्टावृतो गेहः सकलार्थप्रसाधकः ।
अत्र स्थित्वा महीपालः सुचिरं पाति मेदिनीम् ॥”
दीर्घम् ५१ । प्रस्थम् ३० । इति सुन्दरः ॥*॥
“द्वौ राजहस्तावायामे परिणाहे तथैव च ।
इत्ययं सर्व्वतोभद्रः शुक्रश्चास्याधिदेवता ॥
दानवा रक्षकाश्चैव पूज्यास्ते चात्र यत्नतः ।
चतुर्द्दशास्य द्वाराणि कृष्णचित्राहतानि च ॥
पीतपट्टावृतो ह्येष सर्व्वानिष्टविनाशनः ।
अत्र स्थित्वा महीपालः सर्व्वान् शत्रून् निहन्ति ॥”
दीर्घम् २१ । प्रस्थम् २० । इति सर्व्वतोभद्रः ॥*॥
“अष्टकोणो भवेद्भयः कोणो हस्तचतुष्टयः ।
राजहस्तोन्नतः कार्य्यो बुधश्चास्याधिदेवता ॥
रक्षका वसवश्चास्य पूज्यास्तेऽत्र प्रयत्नतः ।
अष्टौ द्वाराणि चास्य स्युः पीतचित्राहतानि च ॥
पीतपट्टावृतो ह्येष सर्व्वानिष्टविनाशनः ।
अत्र स्थाता क्षितिपतिर्न रिष्टैरवमृद्यते ॥
राजदण्डो भवेद्दीर्घः प्रसरे राजहस्तकः ।
राजहस्ते राजहस्ते प्रकोष्ठांस्तत्र कारयेत् ॥
अयं नान्दीमुखो नाम चन्द्रश्चास्याधिदेवता ।
नक्षत्रलोकः पूज्योऽत्र स यस्मादस्य रक्षकः ॥
द्वाविंशतिस्तु द्वाराणि दीर्घे दश तथान्तरे ।
अन्यत्र दीर्घे एकं स्यात् प्रसरे एकमेव च ॥”
दीर्घद्वितये दश द्वाराणि प्रसरद्वितये एकं कृत्वा द्वितयं एवं २२ द्वाराणि ।
“शुक्लचित्रेण सहितः शुक्लपट्टेन शोभितः ।
सर्व्वार्थसाधको राज्ञां लक्ष्मीविजयवर्द्धनः ॥”
दीर्घम् ११ । प्रस्थम् १० । इति नान्दीमुखः ॥*॥
“दीर्घे त्रयो राजहस्ताः प्रसरे द्वौ प्रतिष्ठितौ ।
विनोद एव द्वाराणि त्रिंशत्कोष्ठद्वयं भवेत् ॥
रक्तचित्रेण चित्राङ्गो रक्तवस्त्रोपगूहितः ।
अत्र स्थाता नरपतिर्भवेत् कीर्त्तिप्रतापवान् ॥
सूर्य्याधिदेवता चास्य रक्षकाः सकलग्रहाः ॥”
दीर्घम् ३१ । प्रस्थम् २० । इति विनोदः ॥ * ॥
“दीर्घेण राजदण्डार्द्धं प्रसरे राजहस्तकौ ।
विलास एष द्वाराणि चत्वारिंशद्बुधा विदुः ॥
गन्धर्व्वा रक्षकाश्चास्य प्रकोष्ठत्रितयं भवेत् ।
चित्रपट्टेन शुक्लेन चित्रवस्त्रेण शोभितः ॥
दुर्भिक्षशमनो ह्येष शस्यसम्पत्तिकारकः ।
तत्र स्थित्वा नरपतिः प्रचुरं सुखमश्नुते ॥”
दीर्घम् ५१ । प्रस्थम् २० । इति विलासगृहम् ॥ * ॥
“द्वादशहस्ताः प्रसरे दीर्घे द्वौ राजहस्तकौ कथितौ ।
विजये द्वादश भवनद्वाराणि स्युर्जयप्रदान्यत्र ॥
सूर्य्योऽधिदेवता चास्य रक्षतीमं विहङ्गराट् ।
अरुणाम्भोजचित्राङ्गो अरुणाम्बरभूषितः ।
तत्र स्थित्वा नरपतिः कृत्स्नां शास्ति वसुन्धराम् ॥”
दीर्घम् २१ । प्रस्थम् १२ ॥ * ॥
“आयामे राजदण्डौ द्वौ प्रसरे राजदण्डकः ।
शतद्वारोपसहितः प्रकोष्ठैर्द्दशभिर्युतः ॥
दिक्पाला रक्षकाश्चास्य कुजश्चास्याधिदेवता ।
नानावर्णेन चित्रेण वसनेन विभूषितः ॥
अत्र स्थित्वा नरपतिः सुचिरं सुखमश्नुते ।
यस्मिन्नाम्नि प्रतिष्ठेत विमलो गृहसत्तमः ॥
दुर्भिक्षं नात्र जायेत नेतयोर्न च विप्लवः ।
न रोगो नापि शोकश्च नैवोत्पातभवस्तथा ।
इत्यादि गुणबाहुल्यमन्यत्र कथितं बुधैः ॥”
दीर्घम् २०० । प्रस्थम् १०० ॥ * ॥
“आयामपरिणाहाभ्यां राज्ञः षोड़शहस्तकः ।
द्वाराणि षोड़शैवास्य गुरुरस्याधिदेवता ॥
रक्षिका देवता चास्य शुक्लवस्त्रैर्विभूषणम् ।
अत्र स्थित्वा नरपतिः सर्व्वार्थान् भुवि साधयेत् ॥”
दीर्घम् १७ । प्रस्थम् १६ । इति रङ्गः ॥ * ॥
“आयामे राजदण्डः स्यात् प्रसरे च तदर्द्धकम् ।
दश प्रकोष्ठा द्वाराणि शनिरस्याधिदेवता ॥
पिशाचा रक्षकाश्चास्य नीलवस्त्रादिभूषणम् ।
नाम्नायं केलिराख्यातो भयरोगविनाशनः ।
अत्र स्थित्वा नरपतिः सुखं विजयते रिपून् ॥”
दीर्घम् १०० । प्रस्थम् ५० ॥ * ॥
“राजहस्तेन कोणः स्यादेवं केलिश्चतुर्द्दश ।
चतुर्द्दशैव द्वाराणि राहुरस्याधिदेवता ॥
नक्तचरा रक्षकास्तु नानावर्णाम्बरादिकम् ।
अयं जयः प्रकटितः सर्व्वत्रैव जयप्रदः ॥
आयामे राजहस्तः स्यात् परिणाहेऽष्टहस्तकः ।
नागाङ्कपः कुटीरूपो वीरो नाम यशप्रदः ॥
बृहस्पतिर्देवतास्य रक्षकाश्चास्य खेचराः ।
विचित्रवसनोपेतः सर्व्वकामार्थदायकः ॥”
दीर्घम् ११ । प्रस्थम् ८ । इति वीरः ॥ * ॥
“यो यस्य गदितो वर्णस्तथा स्याच्चामरोऽपि च ।
राजहस्तान्तरे पञ्च चामराः स्युर्म्महीभुजाम् ॥
चन्द्रोऽपि दर्पणो हस्त उपरि क्रमतो न्यसेत् ।
पताकाध्वजयुक्ताश्च गृहरक्षक-रक्षसाम् ।
छत्रयुक्तं गृहं राज्ञां विज्ञेयं चक्रवर्त्तिनाम् ॥”
एषां नियमः परवत् ।
“इति द्वादशचिह्नानि गृहाणां कथितानि वै ।
विमृश्यैतानि नृपतिर्गृहारम्भं समाचरेत् ॥
इति सिंहासनस्थानमिति राष्ट्रस्य मस्तकम् ।
इतोऽन्ये चित्तहर्वार्थाः प्रासादाः पृथिवीभुजः ॥
जलयन्त्रादयो येऽन्ये तेषां नास्ति विनिश्चयः ।
स्वजन्मगेहसंस्थो यो नृपतिः शुभचेतनः ॥
स चिरं पृथिवीं शास्ति सर्व्वार्थान् साधयत्यपि ।
यो वा तत्परगेहस्थो दुर्म्मोहात् धरणीपतिः ॥
न चिरं पाति वसुधां घोरं रोगञ्च विन्दति ।
स्वलग्नपतिमित्रस्य गृहवासो न दुष्यति ॥”*॥
परञ्च ।
“हीरकस्य विशुद्धस्य ब्रह्मजातम्महाद्युतेः ।
सर्व्वाङ्गस्पर्शमात्रेण वमतो दीप्तिमच्छिखाः ।
गृहाग्रे धारयेद्राजा तद्वज्रं वज्रवारणम् ॥”
वात्स्यस्तु ।
“गृहेषु मणिविन्यासो विज्ञेयो न च दण्डवत् ।
विशुद्धहीरकन्यासो विधेयः सदनोपरि ।
तेन सर्व्वाणि नश्यन्ति अरिष्टानि महीभुजाम् ॥”
भोजोऽपि ।
“वास्तुखण्डोऽष्टरूपः स्यात् यथार्थैर्नामभिः स्वकैः ।
यमद्वारात् समारभ्य यावद्द्वारमिष्यते ॥”
तद्यथा,—
“मृत्युर्भयः स्थिरश्चक्रो धनं विभव एव च ।
वीरस्तापश्च इत्यष्टौ वास्तुभागा यथाक्रमम् ॥